तस्मात् पित्तोपसृष्टे तु हिता सा त्ववसेचने ॥
अलाबुकटुकं रूक्षं तीक्ष्णञ्च परिकीर्त्तितम् ।
तस्मात् श्लेष्मोपसृष्टे तु हितं तदवसेचने ॥"

"अथ जलायुका वक्ष्यन्ते । जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः । ता द्वादश, तासां सविषाः षट् तावत्य एव निर्व्विषाः । तत्र सविषाः कृष्णा कर्व्वुरा अलगर्द्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति । ताश्वञ्जनचूर्णवर्णा पृथुशिराः कृष्णा । वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्व्वुरा । रोमशा महापार्श्वा कृष्णमुखलगर्द्दा । इन्द्रायुधवदूर्द्ध्वराजिभिश्चित्रा इन्द्रायुधा । ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका । गोवृषणवदधोभागे द्विधाभूताकृतिरणुमुखी गोचन्दनेति । ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूर्मूर्च्छा ज्वरोदाहश्छर्द्दिर्म्मदः सदनमिति लिङ्गानि भवन्ति । तत्र महागदः पानालेपननस्यकर्म्मादिषूपयोज्यः । इन्द्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः ।

अथ निर्व्विषाः । कपिला पिङ्गला शङ्कुमुखी मूषिका पुण्डरीकमुखी सावरिका चेति । तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्धमुद्गवर्णा कपिला । किञ्चिद्रक्ता वृत्तकाया पिङ्गाशुगा च पिङ्गला । यकृद्वर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखी शङ्कुमुखी मूषिकाकृतिवर्णाऽनिष्टगन्धा च मूषिका । मुद्गवर्णा पुण्डरीकतुल्यवक्त्रा पुण्डरीकमुखी । स्निग्धा पद्मपत्रवर्णाष्टादशाङ्गुलप्रमाणा सावरिका सा च पश्वर्थे । इत्येता अविषा व्याख्याताः । तासां यवनपाण्ड्यसह्यपौतनादीनि क्षेत्राणि । तेषु महाशरीरा बलवत्यः शीघ्रपायिन्यो महाशना निर्व्विषाश्च विशेषेण भवन्ति । तत्र सविषमत्स्यकीटदर्द्दुरमूत्रपुरीषकोथजाताः कलुषेष्वम्भःसु च सविषाः । पद्मोत्पलनलिनकुमुदसौगन्धिककुवलयपुण्डरीकशैवालकोथजाता विमलेषु अम्भःसु च निर्व्विषाः ॥"

"क्षेत्रेषु विचरन्त्येताः सलिलेषु सुगन्धिषु ।
न च सङ्कीर्णचारिण्यो न च पङ्केशयाः सुखाः ॥"

"अथैनां नवे महति घटे सरस्तडागोदकपङ्कमावाप्य निदध्यात् । भक्षार्थे चासामुपहरेच्छैवलं वल्लूरमौदकांश्च कन्दांश्चूर्णीकृत्य शय्यार्थे तृणमौदकानि च पत्राणि । त्र्यहात्त्र्यहाच्चाभ्यो जलं भक्ष्यं च दद्यात् सप्तरात्रात् सप्तरात्राच्च घटमन्यं संक्रामयेत् ॥"

"स्थूलमध्याः परिक्लिष्टाः पृथ्व्यो मन्दविचेष्टिताः ।
अग्राहिण्योऽल्पपायिन्यः सविषाश्च न पूजिताः ॥

अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य संवेश्य वा विरूक्ष्य चास्य तमवकाशं मृद्गोमयचूर्णैर्यद्यरुजः स्यात् । गृहीताश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः सलिलसरकमध्ये मुहूर्त्तंस्थिता विगतक्लमा ज्ञात्वा ताभी रोगं ग्राहयेत् । सूक्ष्मशुक्लार्द्रपिचुप्रोतावच्छन्नां कृत्वा मुखमपावृणुयादगृह्णन्त्यै क्षीरबिन्दुं शोणितबिन्दुं वा दद्याच्छस्त्रपदानि वा कुर्व्वीत यद्येवमपि न गृह्णीयात्तदन्यां ग्राहयेत् । यदा च निविशतेऽश्वखुरवदाननं कृत्वोन्नम्य च स्कन्धं तदा जानीयाद्गृह्णातीति गृह्णन्तीञ्चार्द्रवस्त्रावच्छन्नां धारयेत् सेचयेच्च । दंशे तोदकण्डूप्रादुर्भावैर्ज्जानीयाच्छुद्धमियमादत्त इति शुद्धमाददानामपनयेत् । अथ शोणितगन्धेन न मुञ्चेन्मुखमस्याः सैन्धवचूर्णेनावकिरेत् । अथ पतितां तण्डुलकण्डनप्रदिग्धगात्रीं तैल-लवणाभ्यक्तमुखीं वामहस्ताङ्गुष्ठाङ्गुलीभ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलीभ्यां शनैः शनैरनुलोमानुमार्ज्जयेदामुखाद्वामयेत्तावद्यावत् सम्यग्वान्तलिङ्गानीति । सम्यग्वान्ता सलिलसरकन्यस्ता भोक्तुकामा सती चरेत् । या सीदति न चेष्टते सा दुर्व्वान्ता तां पुनः सम्यग्वामयेत् । दुर्व्वान्ताया व्याधिरसाध्य इन्द्रमदो नाम भवति । अथ सुवान्तां पूर्व्ववत् सन्निदध्यात् शोणितस्य च योगायोगानवेक्ष्य जलौकोव्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेद्बध्नीत वा व्रणं कषायमधुर-स्निग्धशीतैश्च प्रदेहैः प्रदिह्यादिति ।"

"क्षेत्राणि ग्रहणं जातीः पोषणं सावचारणम् ।
जलौकसाञ्च यो वेत्ति तत्साध्यान् स जयेद्गदान् ॥"

इति सूत्रस्थाने त्रयोदशाध्याये सुश्रुतेनोक्तम् ॥)

जलौका, स्त्री, (जलमेव ओकं वसतिस्थानं यस्याः ।) जलजन्तुविशेषः । जोँक इति भाषा । तत्पर्य्यायः । रक्तपा २ जलौकसः ३ इत्यमरः । १ । १० । २२ ॥ जलूका ४ जलाका ५ जलौकाः ६ जलोरगी ७ जलायुका ८ जलिका ९ जलासुका १० जलजन्तुका ११ वेणी १२ जलालोका १३ जलौकसः १४ जलौकसी १५ । इति भरतः ॥ जलौकसम् १६ जलौकसा १७ । इति रायमुकुटः ॥ रक्तपायिनी १८ रक्तसन्दंशिका १९ तीक्ष्णा २० वमनी २१ जलजीवनी २२ । इति राजनिर्घण्टः ॥ रक्तपाता २३ वेधिनी २४ जलसर्पिणी २५ जलसूचिः २६ जलाटनी २७ जलाका २८ जलपटालिका २९ जलिका ३० जलालुका ३१ । इति शब्दरत्नावली ॥ (यथा सुश्रुते शारीरस्थानेऽष्टमेऽध्याये ।

"सिरा-विषाणतुम्बैस्तु जलौकाभिः पदैस्तथा ।
अवगाढं यथापूर्व्वं निर्हरेद्दुष्टशोणितम् ॥"

अस्या विवरणमन्यत् सविस्तरं जलौकःशब्दे व्याख्यातम् ॥)

जल्प, वाचि । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) अन्तःस्थतृतीयोपधः । जल्पति । इति दुर्गादासः ॥ (यथा, महाभारते । ७ । १४६ । १२ ।

"नारिं जित्वा विकत्थन्ते नच जल्पन्ति दुर्वचः ॥")

जल्पः, पुं, (जल्प वाचि+घञ् ।) विजिगीषोः कथा । परमतखण्डनपूर्व्वकं स्वमतव्यवस्थापनम् । इति जटाधरो गौतमश्च ॥ ("यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥" इति न्यायसूत्रम् । १ । ४२ ॥

"स वादो द्विविधः संग्रहेण जल्पो वितण्डा च । तत्र पक्षाश्रितयोर्वचनं जल्पः ।"

"यथैकस्य पक्षः पुनर्भवोऽस्तीति नास्तीत्यपरस्य तौ च स्वपक्षं स्वस्वहेतुभिः स्थापयतस्तत्परपक्षमुद्भावयतः एषः जल्पः ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥) कथा । (यथा, भागवते । १ । ७ । १७ ।

"इति प्रियां वल्गुविचित्रजल्पैः
स सान्त्वयित्वाच्युतमित्रसूतः ॥")

जल्पनं, क्ली, (जल्प+भावे ल्युट् ।) कथनम् । यथा,—

"किं मिथ्या शतजल्पनेन सततं रे वक्र रामं
वद ॥"

इत्युद्भटः । (जल्पतीति । जल्प+नन्द्यादित्वात् ल्युः । कथके, त्रि ॥)

जल्पाकः, त्रि, (जल्पतीति । जल्प+"जल्पभिक्षकुट्टलुण्टवृङः षाकन् ।" ३ । २ । १५५ । इति षाकन् ।) बहुकुत्सितभाषी । तत्पर्य्यायः । वाचालः २ वाचाटः ३ बहुगर्ह्यवाक् ४ । इत्यमरः । ३ । १ । ३६ ॥ (स्त्रियां षित्वात् ङीष् । यथा, भट्टिः । ७ । १९ ।

"जल्पाकीभिः सहासीनः स्त्रीभिः प्रजविना
त्वया ॥")

जल्पितं, त्रि, (जल्प्यते स्म इति । जल्प+क्तः । उक्तम् । इत्यमरः । ३ । १ । १०७ ॥ (यथा, पञ्चतन्त्रे । १ । १४९ । "भो भो गोरम्भ ! सत्यमेतत् यत् त्वया जल्पितम् । किं देवी दन्तिलेन समालिङ्गिता ॥") कथने, क्ली । (यथा, पञ्चतन्त्रे । २ । १३२ ।

"सा प्राह भो प्रियतम ! मिथ्याजल्पितमेतत् ॥")

जवः, पुं, (जवनमिति । जु वेगगतौ+"ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) वेगः । (यथा, महाभारते । ३ । १४१ । २१ ।

"यस्य बाहूबले तुल्यः प्रभावे च पुरन्दरः ।
जवे वायुर्म्मुखे सोमः क्रोधे मृत्युः सनातनः ॥")

वेगवति, त्रि । इति मेदिनी । वे, ७ ॥

जवनं, क्ली, (जु वेगगतौ+भावे ल्युट् ।) वेगः । इत्यमरः । ३ । २ । ३९ ॥

जवनः, पुं, (जु+"जुचङ्क्रम्येति ।" ३।२।१५० । इति युच् ।) वेगः । वेगयुक्ताश्वः । देशविशेषः । इउनान इति पारस्यभाषा । इति हेमचन्द्रः ॥ शीघ्रकारी मृगः । घोटकः । इति राजनिर्घण्टः ॥ म्लेच्छजातिविशेषः । एष पूर्व्वं जवनदेशोद्भवः क्षत्त्रिय आसीत् सगरराजेनास्य सर्व्वशिरोमुण्डनं सर्व्वधर्म्मबहिष्कृतत्वञ्च चकार । इति हरिवंशः ॥ (स्कन्दस्य सैनिकविशेषः यथा, महाभारते । ९ । ४५ । ७२ ।

"शृणु नामानि चाप्येषां येऽन्ये स्कन्दस्य
सैनिकाः ॥"